**अहङ्कृत** त्रि॰ अहमिति कृतं येन । १ सगर्वे २अभिमानवति च । "जातिरूपवयोवृत्तिविद्यादिभिरहङ्कृतः" याज्ञ॰ । "यस्य नाहङ्कृतोभावो बुद्धिर्यस्य न लिप्यते" गीता ।

**अहङ्कृति** स्त्री अहम्+कृ–क्तिन् । अहङ्कारशब्दार्थे ।

**अहत** न॰ हन–क्त न॰त॰ । "ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् । अहतं तद्विजानीयात् पावनं सर्वकर्म्मसु" १इत्युक्तलक्षणे "निर्णेजकाक्षालितं यदहतं तत् प्रचक्षते २इत्युक्तलक्षणे च वस्त्रे "अहतैश्चैव वासोभिर्माल्यैरुच्चावचैरपि" भा॰स॰प॰ ४ अ॰ । अहतवासा इत्यादौ करकङ्कणादिवत् तत्काले अहतत्वादिबोधनाय । ३भोगेनानाश्रिते "पञ्चद्रौणिक एवैकः सुवर्णस्याहतस्य वै" भा॰स॰प॰ ४९ अ॰ ४हतभिन्ने च त्रि॰ ।

**अहति** स्त्री अभावे न॰त॰ । १हननाभावे अविनाशे "अजीवातवेऽहतये पवस्व" ऋ॰९,९६४ न॰त॰। २हननशून्ये विनाशशून्ये त्रि॰ ।

**अहन्** न॰ न जहाति न त्यजति सर्वथा परिवर्त्तनम् । न+हा–कनिन् । १दिवसे । "अहनि च तमस्विन्यां साङ्घप्रहरयामान्तः" स्मृतिः । "अन्योन्यसंसक्तमहस्त्रियामम्" रघुः । अहःशब्दश्च दिवसएव प्रसिद्धः "अहो अहोभिर्महिमा हिमागमे" नैष॰ क्वचित्तु दिनरात्रिपरः यथा "मासैर्द्वादशभिर्वर्षैं दिव्यं तदहरुच्यते" सू॰सि॰ । "विप्रः शुध्येत् दशाहेन द्वादशाहेन भूमिः । वैश्यः पञ्चदशाहेन" मनुः । "अघाहेषु निवृत्तेषु" "द्वादशाहः प्रशस्यते" स्मृतिः तत्परिमाणमुक्तं कालमाध॰ विष्णुध॰। "लघ्वक्षरसमामात्रा निमेषः परिकीर्त्तितः । ततः सूक्ष्मतरः कालोनोपलभ्योभृगूत्तम ! नोपलभ्यं यथा द्रव्यं सुसूक्ष्मं परमाणुतः । द्वौ निमेषौ त्रुटिर्ज्ञेयः प्राणः पञ्चत्रुटिः स्मृतः । विनाडिका तु षट्प्राणा तत्षष्टिर्नाड़िका स्मृता । अहोरात्रं तु तत्षष्ट्या नित्यमेतत् प्रकीर्त्तितम् । त्रिंशन्मुहूर्त्ताश्च तथा अहोरात्रे प्रकीर्त्तिताः । तत्र पञ्चदश प्रोक्ता राम ! रात्रौ दिवा तथा । उत्तरां तु यदा काष्ठां क्रमादाक्रमते रविः । तदा क्रमाद्भवेद्वृद्धिर्दिवसस्य महाभुज ! । तदाश्रितमुहूर्त्तानां तदा वृद्धिः प्रकीर्त्तिता । दिनवृद्धिर्यदा राम ! दोषाहानिस्तदा भवेत् । तदाश्रितमुहूर्त्तानां हानिर्ज्ञेया तथा तथा । यदा तु दक्षिणां काष्ठां क्रमादाक्रमते रविः । दिवसस्य तदा हानिर्ज्ञातव्या तावदेव तु । क्षीयन्ते तस्य हानौ च तन्मुहूर्त्तास्तथैव च । रात्र्याश्रिताश्च वर्द्धन्ते रात्रयश्च क्रमेण तु । यदा मेषं सहस्रांशुस्तुलाञ्चैव प्रपद्यते । समरात्रिन्दिवः कालो मुहूर्त्तश्च तदा समः" । मुहूर्त्तानां स्रौतस्मार्त्त ज्यौतिषाणि नामानि त्रिविधानि तत्र श्रौतानि कालमा॰ द्रष्टव्यानि । ज्यौतिषाणि आह कश्यपः "गौरीवल्लभसर्पमित्रपितरो वस्वम्बु विश्वाह्वया ब्रह्माम्भोरुहसम्भवेन्द्रहुतभुग्दैत्येशनक्तञ्चराः । तोयेशार्य्यमयोनयोदश तथा पञ्चाप्यमी वासरे" । रुद्राजाहिर्बुध्नपूषाश्विनाः स्युः कीनाशोऽग्निर्द्धातृचन्द्रादितीज्यः । विष्णुर्भानुस्त्वष्टृघातामुहूर्त्ता रात्रौ क्रूरास्त्वन्तकाजाग्निरुद्राः" । स्मार्त्तनामानि तु "रौद्रश्चैतश्च मैत्रश्च तथा सारस्वतः स्मृतः । सावित्रो वैश्वदेवश्च गान्धर्व्वः कुतपस्ततः । रौहिणस्तिलकश्चैव विभवोनिर्ऋतिस्तथा । शम्बरोविजयश्चैव दिवा पञ्चदश स्मृताः । शङ्करश्चाजपादश्च तथाहिर्बुध्नमैत्रकौ अश्विनौ याम्य आग्नेयो वैधात्रश्चान्द्र एव च । आदितेयोऽथ जैवश्च वैष्णवः सौर एव च । ब्राह्मोनाभस्वतश्चैव मुहूर्त्ताः क्रमशोनिशि" । एतदनुसारेणैव "ब्राह्मे मुहूर्त्ते किल तस्य देवीति" रघुः "मैत्रे मुहूर्त्ते शशलाञ्छनेन" कुमा॰ "आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः" इत्यादि प्रयोगः । अह्नश्च द्विधा त्रिधा चतुर्द्धा पञ्चधा पञ्चदशधेति पञ्चधा विभागकल्पनापि दृश्यते । तत्र द्विधा विभागाभिप्रायेण । "यथा चैवापरः पक्षः पूर्व्वपक्षात् विशिष्यते । यथा श्राद्धस्य पूर्व्वाह्णादपराह्णो विशिष्यते" मनुः त्रिधा विभागे "ऊर्द्ध्वं सूर्य्योदयात् प्रोक्तं मुहूर्त्तानां तु पञ्चकम् । पूर्व्वाह्णः पञ्चकं प्रोक्तं मध्याह्नस्तु ततः परम् । अपराह्णस्ततः प्रोक्तं मुहूर्त्तानां तु पञ्चकम्" । "तस्मादह्नः पूर्व्वाह्णे देवा अशनमभ्यवहरन्ति मध्यदिने मनुष्याः अपराह्णे पितरः" गौत॰ "पूर्व्वाह्णोवै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितृणाम्" श्रुतिः चतुर्द्धा विभागे गोभिलः । "पूर्व्वाह्णः प्रहरं यावत् मध्याह्नः प्रहरस्ततः । आतृतीयादपराह्णः सायाह्नश्च ततः परम्" । पञ्चधा विभागमाह व्यासः । "मुहूर्त्तत्रितयं प्रातस्तावदेव तु सङ्गवः । मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः । सायाह्नस्त्रिमुहूर्त्तः स्यात् सर्वकार्य्येषु पुरस्कृतः" एवमेव दक्षोक्तविभागः तत्राह: नवविधम् "ब्राह्मं दिव्यं तथा पैत्रं प्राजापत्यं गुरोस्तथा । सौरञ्च सावनञ्चान्द्रमार्क्षं मानानि वै नव" सू॰सि॰ । तत्र ब्राह्मम् "इत्थं युगसहस्रेण भूतसंहारकारकः । कल्पो ब्राह्ममहःप्रोक्तं शर्वरी तस्य तावतीति" । दिव्यमुक्तं तत्रैव "मासैर्द्वादशभिर्वर्षैर्दिव्यं